सूर्त्तित्रयं पाययेत् । शोध्यस्य जलविधानोक्तेन "सत्यान्तरविभागस्थ" इत्यादिना मन्त्रेणाभिमन्त्र्य पिबेत् । तथा च नारदः "तमाहूयाभिशस्तन्तु मण्डलाभ्यन्तरे स्थितम् । आदित्याभिमुखं कृत्वा पाययेत् प्रसृतित्रयमिति" । पितामहोऽपि "प्राङ्मुखं कारिणं कृत्वा पाययेत् प्रसृतित्रयम् । पूर्व्वोक्तेन विधानेन स्नानमात्रोचितं शुचिमिति" । कारिणं दिव्यकारिणं शोध्यमिति यावत् । पूर्व्वोक्तेन सकलदिव्यसाधारणतया प्रागुक्तेनेत्यर्थः । नारदोऽपि "अर्चयित्वा तु तं देवं प्रक्षाल्य सलिलेन तु । एनस्य श्रावयित्वा तु पाययेत् प्रसृतित्रयमिति" । एनः पापम् । तच्च तत्प्रलापाभिधानमुखेन तेनैव दर्शितम् । "स्वेच्छया यः पिबेत्कोशन्न कश्चिद्दूषितो नरः । न संवदेन्नरो लोभात् क्षत्री भवति दुर्म्मतिः । जानानः कामकारेण कोशम्पीत्वा विसंवदेत् । दरिद्रो व्याधितो मूर्खः सप्तजन्मानि जायते" इति । सशिरस्केऽभियोगे अभियोक्तुः आव्यमनिष्टमप्याह स एव "बलात्कोशं हि यो दत्त्वा हितमिच्छेत चात्मनः । स विनाशो भवेत्तस्य तच्च कार्य्यं न सिद्ध्यतीति" । एवं यस्य कस्यचिदुग्रदैवस्य स्नानोदकमाहूय कोशानुष्ठाने प्राप्ते नियमार्थमाह पितामहः "भक्तो यो यस्य देवस्य पाययेत्तस्य तज्जलम् । समभावे तु देवानामादित्यस्य तु पाययेत् । दुर्गायाः पाययेच्चौरान् ये च शस्त्रोपजीविनः । भास्करस्य तु यत्तोयं ब्राह्मणं तत्र पाययेदिति" । उग्रदेवतायुधानि स्नापयित्वा तदुदकं स्वल्पेऽपराधे पाययेत् । तथा च कात्यायनः "स्वल्पेऽपराधे देवानां पाययित्वाऽऽयुधोदकम् । पाय्योविकारे चाशुद्धो नियम्यः शुचिरन्यथेति । पाय्यः पाययितव्यः । नियम्यो दण्ड्यः । आयुधग्रहणं ताम्रादिनिर्म्मितादित्यमण्डलस्याप्युपलक्षणम् अत एव वृहस्पतिः "यद्भक्तः सोऽभियुक्तः स्यात्तद्देवायुधमण्डलम् । प्रक्षाल्य पाययेत्तस्माज्जलात्तु प्रसृतित्रयमिति" अत्र विशेषमाह पितामहः "दुर्गायाः पाययेच्छूलमादित्यस्य तु मण्डलम् । अन्येषामपि देवानां स्नापयेदायुधानि त्विति" । कृतकोशपानस्य किं तत्कालमेव शुद्धिर्नेत्याह कात्यायनः "अथ दैवविसंवादस्त्रिसप्ताहात्तु दापयेत् । अभियुक्तं प्रयत्नेन तमर्थं दण्डमेव चेति" । दैवविसंवादः दैविकव्याध्युद्भवः । दैविकव्याध्यादीनपि स एव दर्शयति "ज्वरातिसारविस्फोटाः शूलास्थिपरिपीडनम् । नेत्रहग्भालरोगश्च तथोन्मादः प्रजायते । शिरोरुग्भुजभङ्गश्च दैविका व्याधयो नृणामिति" । शुद्धिकालावधिं विष्णुरप्याह "यस्य पश्येद्द्विसप्ताहात् त्रिसप्ताहादथापि वा । रोगोऽग्निर्ज्ञातिमरणं राजदण्डमथापि वा । तमशुद्धं विजानीयात् तथा शुद्धं विपर्य्ययेत् । दिव्ये च शुद्धं पुरुषं सत्कुर्य्याद्धार्म्मिको नृपः" इति । पितामहोऽपि "त्रिरात्रात्सप्तरात्राद्वा द्विसप्ताहादथापि वा । वैकृतं यस्य दृश्येत पापकृत्स तु मानवः । तस्यैकस्य न सर्व्वस्य जनस्य यदि तद्भवेत् । रोगोऽग्निर्ज्ञातिमरणं सैव तस्य विभावनेति" । तद्रोगवैकृतं कृतकोशपानस्यैकस्य यदि भवेत् तदैव स पापकृदिति न, किन्तु तदीयसर्व्वस्य जनस्य मध्येऽपि यदि कस्यचिद्भवेत् तदापीत्यर्थः । अतएव वृहस्पतिः "सप्ताहाद्वा द्विसप्ताहाद्यस्यार्त्तिर्न प्रजायते । पुत्रदारधनानाञ्च स शुद्धः स्यान्न संशयः" इति । याज्ञवल्क्योऽपि "अर्व्वाक्चतुर्दशादह्नो यस्य नो राजदैविकम् । व्यसनञ्जायते घोरं स शुद्धः स्यान्न संशयः" इति । एतेषाञ्च त्रिरात्रादीनां पञ्चानाम् अभियोगाल्पत्वमहत्त्वाभ्यां व्यवस्था ज्ञातव्या । अवधेरूर्द्धन्तु रोगाद्युद्भवेऽपि न पराजयः तथा च नारदः "ऊर्द्ध्वं यस्य द्विसप्ताहाद्वैकृतन्तु महद्भवेत् । नाभियोज्यस्तु विदुषा कृतकालव्यतिक्रमादिति" । अत्र द्विसप्ताह इत्यवधिकालमात्रोपलक्षणम् कृतकालव्यतिक्रमहेतोरभिधानात् । तेनैकविंशतिरात्रस्यावधिकालत्वाश्रयणे चतुर्दशरात्रादूर्द्ध्वमपि वैकृतोत्पत्तौ पराजयः एवं त्रिरात्रसप्तरात्रात् प्रागपि वैकृतोत्पत्तौ पराजय इति सिद्धम्

१५ कोषवदारकेषु वेदान्तप्रसिद्धेषु अन्नमयादिषु पञ्चसु पदार्थेषु अन्नमय प्राणमयः मनोमयः विज्ञानमयः आनन्दमयः इत्येते पञ्च पदार्था अनात्मकाः तेषामात्मतोविवेकार्थं वेदान्तिभिः कल्पिताः । तत्र पञ्चकोषविवृतिः विवेकचूड़ामणौ "देहोऽयमन्नभवनोऽन्नमयस्तु कोषश्चान्नेन जीवति विनश्यति तद्विहीनः । त्वक्चर्म्ममांसरुधिरास्थिपुरीषराशिर्नायं स्वयं भवितुमर्हति नित्यशुद्धः । पूर्व्वं जनेरपि मृतेरधुनायमस्ति जातक्षणः क्षणगुणोऽनियतस्वभावः । नैकोजड़श्च घटवत्परिदृश्यमानः स्वात्मा कथं भवति भावविकारवेत्ता । पाणिपादादिमान् देहो नात्मा व्यङ्गोऽपि जीवनात् । तत्तच्छक्तेरनाशाच्च न नियम्योनियामकः । देहतद्धर्म्मतत्कर्म्मतदवस्थादिसाक्षिणः । स्वतएव स्वतः सिद्धं तद्वैलक्षण्यमात्मनः । शल्यराशिर्म्मांसलिप्तो मलपूर्णोऽतिकश्मलः । कथं भवेदयं वेत्ता स्वयमेतद्विलक्षणः । त्वङ्मांसमेदोऽस्थिपुरीषराशावहंमतिं मूढजनः करोति ।